श्री॥

1373-Ms

॥ श्रीगणेशाय नमः ॥ ॐ वंदे देवमुमापतिं सुरगुरुं वंदे जगत्कारणं
वंदे पन्नगभूषणं मृगधरं वंदे पशूनां पतिं ॥ वंदे सूर्यशशांकव दे
ह्निनयनं वंदे मुकुंदप्रियं वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शं
करं ॥ १ ॥ शांतं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं ॥ शू
लं वज्रं च खड्गं परशुमभयदं दक्षिणांगे वहंतं ॥ नागं पाशं च घंटा
डमरुकशहितं शांकुशं वामभागे ॥ नानालंकारदीप्तं स्फुटिक
मणिनिभं पार्वतीशं नमामी ॥ २ ॥ आदौ कर्मप्रशंगात्कलयति क
लुषं मातृकुक्षौ स्थितस्य तन्मूत्रामेध्यमध्ये व्यथयति नितरां जाठरो

जातवेदाः। यद्यद्यत्तत्र दुःखं विषगतिविषमं शक्यते केन वक्तुं। क्षंत
व्यो मेपराधः शिवाशिव शिव भो श्रीमहादेव शंभो॥ १॥ बाल्ये दुःखाति
रेको मललुलितवपुः स्तन्यपाने पिपासा। नो शक्यं चेंद्रियेभ्यो भव
गुणाजनिता जंतवो मां तुदंति॥ नानारोगोत्थ दुःखाद्रुदनपरिवश
शंकरं न स्मारामि॥ क्षंतव्यो०॥ ४॥ प्रौढोहं यौवनस्थो विषयविष
धरैः पंचभिर्मर्मसंधौ॥ दष्टो निष्टो विवेकः सुतधनयुवती स्वादु।
सौख्ये निषण्णः। शैवी चिंताविहीनं मम हृदयमहो मानगर्वाधिरूढं
क्षंतव्यो०॥ ५॥ वार्द्धक्ये चेंद्रियाणां विगतगतिमतिश्चाधिदेवादितापैः।

२ पापे रोगे वियोगे ह्यव्यवसितवपुषा: श्रोत्रहीनं च दीनं ॥ मिथ्यामोहाभि
लाषैर्भ्रमति मम मनो धूर्जटे ध्यानशून्यं ॥ क्षंतव्यो० ॥ ६ ॥ नो शक्यं
स्मार्तकर्म्मप्रतिपदगहनंप्रत्यवायाकुलाढ्यं ॥ श्रौते वार्त्ता कथं मे द्वि
जकुलविहिते ब्रह्ममार्गे सुसारे ॥ ज्ञातो धर्मो विचारश्रवणमनन
योर्को निदिध्यासितव्यः ॥ क्षंतव्यो० ॥ ७ ॥ स्थित्वा स्थाने सरोजे प्रणवम
यमरुत्कुंभिते ब्रह्मरंध्रे ॥ स्वंते शांते प्रलीने प्रकटितगहने ज्योतिरूपे
पराख्ये ॥ लिंगं ते ब्रह्मवाक्यं सकलमुखकरं न तं नैव दृष्टं कदाचित् ॥
क्षंतव्यो० ॥ ८ ॥ नग्नो निःशंकशुद्धस्त्रिगुणविरहितो ध्वस्तमोहांधकारी २

नासाग्रेन्यस्तदृष्टिर्विहतभवभयोनैवदृष्टंकदाचित्॥उन्मत्यावस्थ
यात्वांविगतकलिमलंशंकरंनस्मरामि॥क्षंतव्यो०॥९॥स्नात्वाप्र
त्युषकालेस्नपनजलविधौनाहृतंगांगतोयं॥पूजार्थंवाकदाचि
द्बहुतरगहनात्खंडबिल्वीदलानि॥नानीतापद्ममालासरसिविक
सितागंधधूपैस्त्वदर्थं॥क्षंतव्यो०॥१०॥ध्यानंचित्तेशिवाख्यंप्रचुरतर
धनंनैवदत्तंद्विजेभ्यो॥हव्यंतेलक्षसंख्यैर्हुतवहवदनेनार्पितंबीज
मंत्रैः॥नोतप्तंगांगतीरेव्रतजपरिचरणैरुद्रजाप्यैर्नदेवं॥क्षंतव्यो०॥
११॥दुग्धैर्मध्वाज्ययुक्तैर्दधिसितसहितैःस्नापितंनैवलिंगं॥नोलि

तंचंदनाद्यैःकनकविरचितैर्भूषितैर्नप्रसूनैः॥धूपैःकर्पूरदीपैर्विविधरस
३ युक्तैर्नैवभक्ष्योपहारैः॥क्षंतव्यो०॥१२॥करचरणकृतंवाक्कायजंकर्म
जंवा॥श्रवणनयनजंवामानसंवापराधं॥विहितमविहितंवासर्वमेत
त्क्षमस्व॥जयजयकरुणाब्धेश्रीमहादेवशंभो॥१३॥चंद्रोद्भासित
शेखरेस्मरहरेगंगाधरेशंकरे॥सर्पैर्भूषितकंठकर्णविवरेनेत्रोत्थ
वैश्वानरे॥दंतीत्वक्कृतसुंदरांबरधरेत्रैलोक्यसारेहरे॥मोक्षार्थंकु
रुचित्तवृत्तिमचलामन्यैस्तुकिंकर्मभिः॥१४॥किंदानेनधनेनवाजिकर
भिःप्राप्तेनराज्येनकिंकिं॥वापुत्रकलत्रमित्रपशुभिर्देहेनगेहेनकिं॥

ज्ञात्वैतत्क्षणभंगुरंसमपदिरेत्याज्यंमनोदूरतः स्वात्मार्थंगुरुवाक्य
तोभजभजश्रीपार्वतीवल्लभं॥१५॥आयुर्नश्यतिपश्यतांप्रति
दिनंयातिक्षयंयौवनं॥प्रत्यायांतिगताउनर्नदिवसाकालोज
गद्भक्षकः॥लक्ष्मीस्तोयतरंगभंगचपलाविद्युच्चलंजीवितं॥त
स्मात्वांशरणागतंशरणतत्वंरक्षरक्षाधुना॥१६॥इतिश्रीशं
कराचार्यविरचित्तंअपराधसंदरस्तोत्रसंपूर्णं शुः बाहादर
शुरिजीपठनार्थं